INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:14, Issue:1(4), January: 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

# रघुवंशमहाकाव्ये अर्थालङ्काराः

**आचार्यः के. राजगोपालन्**
आचार्यः, साहित्यविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, अन्ध्रप्रदेशः

## उपोद्घातः

राष्ट्रियकविरूपेणगृहीतोऽयं, उपामाने प्रसिद्धः कालिदासः महाकाव्यपरम्परायाः आद्यो ‘महाकवि’रित्युपाधिना सर्वेषां सहृदयानां सुपरिचितः। तस्य काव्यं कदलीपाकसदृशं सुमनोहरम् सरलं मधुरञ्च भाति। उत्तरोत्तरमनेकेषां कवीनां मार्गदर्शकः कालिदासः काव्यजगति आदिमः कविसम्राडित्यत्र नास्ति विमतिः। अस्य महाकवेः कालः जन्मस्थानादिकं प्रायः सुनिश्चितं न ज्ञायते। बाह्याभ्यन्तरप्रमाणैश्च सः विक्रमादित्यस्य आस्थाने बभूवेति मन्यते।

## तस्य कृतयः

कुमारसंभवम्, मेघदूतम्, रघुवंशम्, ऋतुसंहारं च कालिदासस्य विशेषकाव्याणि सन्ति|

मालविकाग्निमित्रम्-अभिज्ञानशाकुन्तलम्-विक्रमोर्वशीयम् तस्य नाटकानि सन्ति।

## रघुवंशमहाकाव्यम्

महाकाव्यगणनायामादिमं रघुवंशमहाकाव्यं कालिदासेन व्यरचि नवदशसु सर्गेषु। नवविंशतीनां रघूणामत्र चरित्रवर्णनमस्ति। यत्रादर्शचरित्रवन्तो दिलीपोरघुर्दशरथो रामः कुश अतिथिश्च विशेषेण वर्णिताः। षट्सु सर्गेषु रामोऽत्र विशदेन वर्णितः। सामान्यतया काव्येष्वेको नायको भवति। परमस्मिन् महाकाव्ये एको नायको न जगृहे। सर्वस्य रघुवंशस्य कथा रचिता कालिदासेन। दिलीपचक्रवर्तेरारभ्य अग्निवर्णपर्नतमत्र सर्वे रघुवंशीया वर्णिताः। अग्निवर्णस्य मरणानन्तरं गर्भवत्यास्तत्पत्नेः राज्याभिषेकात्कथां विरेमे।

### काव्ये विद्यमाना अर्थालङ्काराः

### अर्थान्तरन्यासः

“तथापि शस्त्रव्यवहारनिष्ठुरे विपक्षभावे चिरमस्य तस्थुषः।
तुतोष वीर्यातिशयेन वृत्रहा पदं हि सर्वत्र गुणैर्निधीयते॥”[1]

---

[1] रघुवंशम् ३/६२

Cover Page
INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:14, Issue:1(4), January: 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

**सर्वत्र पदनिधानमित्यस्य आशयः सर्वजनैरपि विशेषतः शत्रुभिः सद्गुणैः पूर्णः जनः इष्यते इति। गुणैः सर्वत्र पदं निधीयत इति सामान्यम्। रघोः वीर्यातिशयेन शत्रुस्थानस्थित इन्द्रस्तुतोषेति विशेषः। एतत्समर्थयितुमेव कृतस्य गुणनिधानं रघोर्गुणवत्तामिन्द्रस्य चौन्नत्यं वदति। अत्र कर्मणि प्रयोगेण कर्मपदस्य प्राधान्यमस्ति। क्रियोत्थितः अर्थान्तरन्यासः।**

"कौशिकेन स किल क्षितीश्वरो राममध्वरविघातशान्तये।
काकपक्षधरमेत्य याचितस्तेजसां हि न वयः समीक्ष्यते॥"[2]

**अत्र रामलक्ष्मणौ बालाविति वक्ति क्रियापदप्रयुक्तं वाक्यम्। तेजोवतां वयः न समीक्षते। अपि च कौशिकस्य तयोः विश्वासञ्च प्रकटयति। अनया मिषया रामलक्ष्मणौ दिव्यास्त्रविद्यामर्जयेयुरिति तदर्थमर्हौ चेति वयः न समीक्षते इति कथयन्नेव समीक्ष्यैव तौ कौशिकः नयतीति वर्णयति कविः। अर्थान्तरन्यासोऽत्र।**

**अलङ्कारसङ्करः**

"त्रस्तेन तार्क्ष्यात्किल कालियेन मणिं विसृष्टं यमुनौकसा यः।
वक्षःस्थलव्यापिरुचं दधानः सकौस्तुभं ह्रेपयतीव कृष्णम्॥"[3]

**कृष्णस्य कथात्र सर्वथाऽप्रासङ्गिकः। यतः कथेयं रघूणां वर्तते। श्रीकृष्णस्तावद्द्वापरे बभूव। पूर्वकथायां परकथायाः मिथ्या सन्निवेशः केवलं कविकृतचाटुप्रयोगयैव। कथमत्र सङ्गच्छेत इति न ज्ञायते। अत्र क्रियया व्यतिरेकोत्प्रेक्षयोः सङ्करः।**

**उत्प्रेक्षालङ्कारः**

"वेलानिलाय प्रसृता भुजंगा महोर्मिविस्फूर्जथुनिर्विशेषाः।
सूर्यांशुसंपर्कसमृद्धरागैर्व्यज्यन्त एते मणिभिः फणस्थैः॥"[4]

**उत्प्रेक्षालङ्कारः। नागाः सूर्यांशुसम्पर्कसमृद्धरागैः फणस्थैर्मणिभिः तेषामस्तित्वं व्यज्यन्त इति। व्यज्यते इत्यस्य प्रयोगेण अत्र सम्यगेको विषयोऽवगन्तव्यः भवति। व्यञ्जनायै अवश्यमेव साधनस्यापेक्षा भवति। यथा रसनिष्पत्तौ विभावादयो भवन्ति तथैव इति। अत्र सूर्यकान्तिः तत्कार्यं सम्पादयति। नाम बहुत्र काव्येषु विभावादीनां विना व्यञ्जना व्यापारस्य निष्पादनं न शक्यते इति।**

सेयं मदीया जननीव तेन मान्येन राज्ञा सरयूर्वियुक्ता।

---

[2] रघुवंशम् ११/१

[3] रघुवंशम् ६/४९

[4] रघुवंशम् १३/१२

Cover Page
INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:14, Issue:1(4), January: 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

दूरे वसन्तं शिशिरानिलैर्मां तरङ्गहस्तैरुपगूहतीव॥”[5]

**आलिङ्गति इति। जननीव सरयूः मां दूरे वसन्तं शिशिरानिलैः तरङ्गहस्तैश्चोपगूहतीव परिष्वजते वा। नाम जन्मभूमिः स्वागतीकरोतीति भावः। एवं कथनेन उत्प्रेक्षालङ्कारं साधयति कविः कथापात्रमुखात्।**

विरक्तसंध्याकपिशं पुरस्ताद्यतो रजः पार्थिवमुज्जिहीते।
शङ्के हनूमत्कथितप्रवृत्तिः प्रत्युद्गतो मां भरतः ससैन्यः।”[6]

**शङ्का भयवितर्कयोरिति तर्कयामि यद्भरतः मदर्थं ससैन्यः प्रत्युद्गत इति। शङ्के शब्देन भावोदयपूर्वक उत्प्रेक्षालङ्कारोऽत्र।**

“शरैरुत्सवसंकेतान्स कृत्वा विरतोत्सवान्।
जयोदाहरणं बाह्वोर्गापयामास किन्नरान्।”[7]

**गै धातोः णिचि प्रयोगेणात्र सः रघुः किन्नराभिः गापयामासेति कथयति। किन्नराणां पराजयेन रोदनस्यास्य रघोः भुजपराक्रमरूपेण गायनमत्रोत्प्रेक्षितम्। वस्तुतः गानं तु न विधीयतेऽत्र परं गापयामासेति प्रयोगेण साधितम्। उत्प्रेक्षालङ्कारोऽत्र।**

“असौ महेन्द्रद्विपदानगन्धी त्रिमार्गगावीचिविमर्दशीतः।
आकाशवायुर्दिनयौवनोत्थानाचामति स्वेदलवान्मुखे ते॥”[8]

**आकाशगङ्गातः प्रसृतः वायुः तस्याः स्वेदमाचामतीति कथनेन विमानस्य देवमार्गसञ्चारः निदर्श्यते। वायुः स्वेदं हरतीति कथयितुं आचामतीति कथयित्वा तस्य वाक्यस्य सुन्दरतां वर्धयति उत्प्रेक्षां च करोति।**

“ततोऽभिषङ्गानिलविप्रविद्धा प्रभ्रश्यमानाभरणप्रसूना।
स्वमूर्तिलाभप्रकृतिं धरित्रीं लतेव सीता सहसा जगाम॥”[9]

**पतित्यागेन खिन्ना सा भूमौ पपात। तस्याः पतनस्य कारणं स्त्रीणामापदि मातैव शरण्यमिति रूपेण ऊहिता। मल्लिनाथोऽत्र उत्प्रेक्षेति। उत्प्रेक्षाकारणमस्ति क्रियापदमत्र। सा च उपमानानुप्राणिता।**

“तस्य प्रयातस्य वरूथिनीनां पीडामपर्याप्तवतीव सोढुम्।

---

[5] रघुवंशम् १३/६३

[6] रघुवंशम् १३/६४

[7] रघुवंशम् ४/७८

[8] रघुवंशम् १३/२०

[9] रघुवंशम् १४/५४

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:14, Issue:1(4), January: 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

वसुंधरा विष्णुपदं द्वितीयमध्यारुरोहेव रजश्छलेन॥"[10]

**उत्प्रेक्षालङ्कारस्य प्रयोगे क्रियायाः सहकारिता। सामान्यतः सेनायाः पादचालनेन धूलिरुत्सरति। तदत्र कविना ऊहयते यत्तेषामागमनमसहमाना भूमिः धूलिछलेन विष्णुपदं अधिरोहतीति। अत्र ऊहायां सेनायाः प्रचुरता अपि व्यज्यते। विष्णुपदं गच्छतीति कथनेन च धूलिराकाशपर्यन्तं व्याप्नोति इति भावोदयश्च।**

"अगस्त्यचिह्नादयनात्समीपं दिगुत्तरा भास्वति संनिवृत्ते।
आनन्दशीतमिव भाष्पवृष्टिं हिमस्रुतिं हैमवतीं ससर्ज॥"[11]

**उत्तरादिक् हिमसृतिं ससर्ज इत्युक्त्वा ग्रीष्मर्तोः सहजतया जायमानहिमस्रावं प्रोषितभर्तृकायाः नायिकायाः आनन्दाश्रुरूपेण ऊहितवान्। तत्र यतोहि सर्जनम् नास्ति तथापि अनया दृष्ट्या सृष्टिः भाति। उत्प्रेक्षालङ्कारोऽत्र।**

"प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद्द्रवरागमेव।
उत्सृष्टलीलागतिरागवाक्षादलक्तकाङ्कां पदवीं ततान॥"[12]

**अत्र एकपादरञ्जितरागेण सा मन्दगतिं विहाय आगवाक्षम् गतेति कथने तस्याःवेगस्य तीव्रतायै कविः ततानेत्यस्य प्रयोगं चकारेति भाति। लाक्षारागचिह्नानि भवन्ति चलनेन न तु विस्तृतं भवति रागः। रागस्य तले विस्तारः भवेत्तदपि एकपादरञ्जितम् नाम तस्याः गतिः कीदृशं भवेदिति ऊहायै सहकारिणी क्रियात्र। उत्प्रेक्षालङ्कारः।**

"खर्जूरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु।
कटेषु करिणां पेतुः पुंनागेभ्यः शिलीमुखाः॥"[13]

**पुन्नागेषु ये शिलीमुखा भ्रमराः पतन्ति स्म। त इदानीं गजानां गण्डस्थलेषु समागत्य पतन्तीत्यत्र तेषां पतनं गजानामुन्मत्ततां च द्योतयति। येन रघोः पराक्रमोऽपि व्यज्यते। यतः पराक्रमी राजा हि मत्तगजं वोढुं समर्थ इत्यस्मात्। उत्प्रेक्षाऽऽत्र।**

"उभयोरपि पार्श्ववर्तिनां तुमुलेनार्तरवेण वेजिताः।
विहगाः कमलाकरालयाः समदुःखा इव तत्र चुक्रुशुः॥"[14]

**राजदम्पत्योः विहारस्थले हठात् पतनमवेक्ष्य तत्रत्याः विहगा अपि दुःखेन क्रोशन्ति स्मेति। अत्र विहगानां क्रोशनं सहजमेव। तस्यास्मिन् पतनदुःखकारणे निवेशनमिव ऊहितम्। येन उत्प्रेक्षायाः कारणमभवत् विहगानां**

---

[10] रघुवंशम् १६/२८

[11] रघुवंशम् १६/४४

[12] रघुवंशम् ७/७

[13] रघुवंशम् ४/५७

[14] रघुवंशम् ८/३९

International Journal of Multidisciplinary Educational Research
ISSN:2277-7881; Impact Factor :9.014(2025); IC Value:5.16; ISI Value:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:14, Issue:1(4), January: 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

**क्रोशनक्रिया।**

"वपुषा करणोज्झितेन सा निपतन्ती पतिमप्यपातयत्।

ननु तैलनिषेकबिन्दुना सह दीपार्चिरुपैति मेदिनीम्॥"[15]

**उत्प्रेक्षालङ्कारोऽत्र ननु शब्देन। सा इन्दुमती करणोज्झिता पतिता मृता इत्यर्थः। किन्तु अजः तां तथा विलोक्यदुःखेन पतितवानित्यर्थः। न तु ग्रहणेन वा इति। यतः अग्रे तस्य कारणं वदति तैलनिषेकबिन्दुना सह दीपशिखापि मेदिनीम् पतत्येव किलेति। अत्र इन्दुमत्याः पतनेन तावदजस्य पतनं तयोः परस्परप्रेमानुरागस्य प्रतीतिं कारयति। दाम्पत्यं नाम तथा स्यादिति। अर्थान्तरन्यासोऽत्र ध्वन्यते च।**

"तया स्रजा मङ्गलपुष्पमय्यां विशालवक्षःस्थललम्बया सः।

अमंस्त कण्ठार्पितबाहुपाशां विदर्भराजावरजां वरेण्यः॥"[16]

**सः अजः विशालवक्षःस्थललम्बया स्रजा तया इन्दुमत्याः बाहुपाशमिव अमंस्त। अत्र मालायाः बाहुपाशवदूहायां मन्यतेः प्रयोगेण उत्प्रेक्षा कारणम्भवति क्रियापदम्।**

**अनुप्रासालङ्कारः**

"हविर्भुजां एधवतां चतुर्णां मध्ये ललाटं तपसप्तसप्तिः।

असौ तपस्यत्यपरस्तपस्वी नाम्ना सुतीक्ष्णश्चरितेन दान्तः॥"[17]

**कर्मणो रोमन्थतपोभ्यां वर्तिचरोः (पा.अ. ३/१/१५) इति तपश्शब्दात् कर्मणः चरतीत्यर्थे वा क्यङ् प्रत्ययः। तपसः परस्मैपदं च। क्रियापदगतयोः तकारपकाराभ्यां छेकानुप्रासः। तकारादवृत्त्यनुप्रासश्च।**

**अतिशयोक्त्यलङ्कारः**

"यावन्नाश्यायते वेदिरभिषेकजलाप्लुता।

तावदेवास्य वेलान्तं प्रतापः प्राप दुःसहः॥"[18]

**श्यैङ् गतौ धातोः शुष्यतीत्यर्थे कृतं क्रियापदमत्र अतिशयोक्त्यलङ्कारस्य कारणम्।**

"रावणस्यापि रामास्तो भित्वा हृदयमाशुगः।

विवेश भुवमाख्यातुमुरगेभ्य इव प्रियम्॥"[19]

15 रघुवंशम् ८/३८

16 रघुवंशम् ६/८४

17 रघुवंशम् १३/४१

18 रघुवंशम् १७/३७

19 रघुवंशम् १२/९१

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:14, Issue:1(4), January: 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

**रामास्तः रामक्षिप्तः बाणः भुवं विवेशेत्यत्र बाणस्य भुवि पतने वेगस्य तीव्रतायाः सङ्केतं करोति। वस्तुतः शरिरमाहत्य बाणस्य गतिर्निवर्तते। परं पातालप्रवेशने शक्यमस्तीति कथनेने बाणप्रयोगे शक्तेरतिशायितां द्योतयितुमिच्छतीति ज्ञायते। अपि च स बाणः पातालाधिपते रावणस्य मरणवार्तां नागलोकेऽपि निवेदयितुमगच्छदिति सारः। अतिशयोक्तिरलङ्कारः। अनुप्रासश्च।**

**दीपकालङ्कारः**

ताम्बूलीनां दलैस्तत्र रचितापानभूमयः।
नरिकेलासवं योधाः शात्रवं च पपुर्यशः॥”[20]

**ताम्बूलीनां दलैः कृतेन पानपात्रेण नारिकेलासवं पपुः शात्रवं यशश्च पपुरिति। अत्र पपुरिति दीपकालङ्कारकारकम्। कलिङ्गराजस्य अपराजितयशः ते सैनिका जहुरित्यर्थः। यशसः पानमत्र उत्प्रेक्षितम्। यशसः पानेन रघोर्विजयः कलिङ्गस्य पराजयः सैनिकानां विजयोत्साह इत्यादयोऽत्र द्योत्यन्ते।**

“शशिनमुपगतेयं कौमुदी मेघमुक्तं जलनिधिमनुरूपं जह्नुकन्यावतीर्णा।
इति समगुणयोगप्रीतयस्तत्र पौराः श्रवणकटु नृपाणामेकवाक्यं विवव्रुः॥”[21]

**अत्र पौराः वाक्यमेकं विवव्रुरिति। उदाजह्रुः इत्यर्थः। ते शरच्चन्द्रमुपागता कौमुदीव जलनिधिमिव भागीरथी चेति सर्वानुमोदं सन्तोषजन्यं वाक्यमेकं विवव्रुः यदन्येषां नृपाणां श्रवणकटुरासीत्। अत्र दीपकालङ्कारकारकं क्रियापदम्।**

“स सीतालक्ष्मणसखः सत्याद्गुरुमलोपयन्।
विवेश दण्डकारण्यं प्रत्येकं च सतां मनः॥”[22]

**सः दण्डकारण्यं विवेश सतां मनश्च विवेशेति दीपकालङ्कारकारणम्। सतां मनस्सु तस्य विशिष्टं स्थानं प्रकटयति क्रियापदम्।**

“निधानगर्भामिव सागराम्बरां शमीमिवाभ्यन्तरलीनपावकाम्।
नदीमिवान्तःसलिलां सरस्वतीं नृपः ससत्त्वां महिषीममन्यत॥”[23]

**अमन्यत इति क्रियात्र दीपकालङ्कारकारकम्। तां निधानगर्भां महिषीं सागरमिव गम्भीरं शमीमिव लीनपावकं नदीमिव सरस्वतीमिव अमन्यत। अत्र गम्भीरता तेजस्विता पवित्रता च तस्यां स ददर्शेति।**

[20] रघुवंशम् ४/४२

[21] रघुवंशम् ६/८५

[22] रघुवंशम् १२/९

[23] रघुवंशम् ३/९

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:14, Issue:1(4), January: 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

“तौ निदेशकरणोद्यतौ पितुर्धन्विनौ चरणयोर्निपेततुः।
भूपतेरपि तयोः प्रवत्स्यतोर्नम्रयोरुपरि बाष्पबिन्दवः॥”[24]

**तौ पितुश्चरणयोः निपेततुः भूपतेश्च अश्रुबिन्दवः तयोः निपेतुरिति। निपेतुरित्यन्वयेन। अत्र अन्वयक्रमे द्विवचनप्रयुक्तस्य क्रियापदस्य वाक्ये बहुवचनत्वेनान्वयः। तयोः चरणपातः पितरि गौरवं राज्यं प्रति राजानं प्रति च निबद्धतां वदति। भूपतेश्च अश्रुपातः तयोः प्रेमानुरागातिशयजातमुत्क्लेदं वदति। इत्त्यं क्रियया कालिदासेन सुन्दरचित्रणमकारि। दीपकालङ्कारोऽत्र। छेकानुप्रासकारकञ्च क्रियापदम्।**

**विभावनालङ्कारः**

“युवा युगव्यायतबाहुरंसलः कपाटवक्षाः परिणद्धकंधरः।
वपुःप्रकर्षादजयद्गुरुं रघुस्तथापि नीचैर्विनयाददृश्यत॥”[25]

**अत्र वपुः प्रकर्षाद्गुरुमजयत् तथापि सर्वैः नीचैरदृश्यत। सः महानंसलः युवा रघुः नीचैः तस्य विनयकारणात् सर्वैरपि नीचैर्दृष्ट इति कथनेन विनयशीलतां सूचयति। विनयशीलता सामान्यप्रजानामप्यासीदिति ज्ञायते। विद्या ददाति विनयमिति वाक्यमनुसृत्य स विद्यावान् स्यादतः स कुत्र विनयेन भाव्यमिति ज्ञात्वा प्रावर्तयदित्यपि स्पष्टं भवति। तस्यानुद्धतायाः विवक्षाऽत्र। विभावनालङ्कारोऽत्र।**

**उदाहरणालङ्कारः**

“नेत्रव्रजाः पौरजनस्य तस्मिन्विहाय सर्वान्नृपतीन्निपेतुः।
मदोत्कटे रेचितपुष्पवृक्षा गन्धद्विपे वन्य इव द्विरेफाः॥”[26]

**उदाहरणालङ्कारोऽत्र। सर्वान् नृपतीन् विहाय नागरिकानां दृष्टयः अजे निपेतुरित्यनेन तस्य सौन्दर्यातिशयतां वक्तुमिच्छति कविः। यतोऽहि नागरिकानां राजदर्शनं भवत्येव परमेकस्मिन्नेव राज्ञि तेषां दृष्टिपतनं नाम सर्वाकर्षः आसीदिति भावः। छेकानुप्रासकारकञ्च।**

**उपमालङ्कारः**

“स्वसुर्विदर्भाधिपतेस्तदीयो लेभेऽन्तरं चेतसि नोपदेशः।
दिवाकरादर्शनबद्धकोशे नक्षत्रनाथांशुरिवारविन्दे॥”[27]

---

[24] रघुवंशम् ११/४

[25] रघुवंशम् ३/३४

[26] रघुवंशम् ६/७

[27] रघुवंशम् ६/६६

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
UGC Approved (2017), Peer Reviewed and Refereed International Journal
Volume:14, Issue:1(4), January: 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

**राजकृतोपदेशः तस्याः चेतसि सूर्यकान्तेरभावे बद्धकोशे यथा चन्द्रकान्तिरिव अन्तरं न लेभे। तस्याः वचांसि शुश्राव परं चेतसि न गताः नाम तस्मिन् सा अनासक्तेति उद्देश्यमत्र। सुन्दरोपमात्र क्रियायुक्तवाक्येनैव सिद्ध्यति।**

"सा किलाश्वासिता चण्डी भर्त्रा तत्संश्रुतौ वरौ।
उद्ववामेन्द्रसिक्ता भूर्बिलमग्नाविवोरगौ॥"[28]

**उपमालङ्कारः। इन्द्रसिक्ताभूः बिलमग्नावुरगाविव सा कैकेयी वरौ उद्ववामेति कथने तस्याः वचनोत्सुकतायाः तीव्रतां द्योतयति कविः। बिलादुरगौ महता वेगेनागच्छतः। वमनं वेगेषु[29] गण्यते आयुर्वेदे। भूमेः ताप कारणात् शरीरे च पित्त(अग्नि)विकाराज्जायते वमनम्। इत्थं उरगाविव वरौ कैकेयी उद्ववामेति प्रयोगः।**

"कुलेन कान्त्या वयसा नवेन गुणैश्च तैस्तैर्विनयप्रधानैः।
त्वमात्मनस्तुल्यममुं वृणीष्व रत्नं समागच्छतु काञ्चनेन॥"[30]

**यथा रत्नस्य काञ्चनेन समागमने शोभाकरं स्यात्तथैव अनयोः समागमः स्यादित्युपमालङ्कारकारणं क्रियापदम्। अत्र लोटः प्रयोगः प्रार्थनायामस्ति। सा सुनन्दा अनयोस्समागमःभवतु इति प्रार्थयति। कविरत्र विशेषतां प्रतिपादयितुमेव प्रयोजयति। यतः सर्वेषां राज्ञां यदा परिचयः कारितः तदा कुत्रापि प्रार्थनाप्रसङ्गः नासीदेव।**

**उपसंहारः**

यतोऽहि कालिदासः उपमालङ्कराय प्रसिद्धः परं तदरित्कततया अन्येऽपि अलङ्काराः तस्य काव्ये विद्यन्त इति सिद्ध्यति। महाकवेः काव्यसौन्दर्यस्य उत्कृष्टतां वर्धयन्त अलङ्कारा अत्र क्रियाप्रधानेनोऽक्ताः। इतरेऽपि सन्ति येऽत्र न प्रस्तुताः।

## उपयुक्तग्रन्थसूची

१. रघुवंशमहाकव्यम्। कालिदासविरचितम्, मल्लिनाथकृतसञ्जीवनी व्याख्योपेतम् ।सम्पादकः श्री. पं. रामचन्द्र झा, व्याकरणाचार्यः। प्रकाशकाः – चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी। वि.सं. २०६९

२. चरकसंहिता; चक्रपाणी व्याख्यानोपेतम्। प्रकाशकाः राष्ट्रिय संस्कृतसंस्थानम् , न्यू दिल्ली, २००९

[28] रघुवंशम् १२/५

[29] न वेगान् धारयेद्धीमाञ्जातान् मूत्रपुरीषयोः। न रेतसो न वातस्य न छर्द्याः क्षवथोर्न च॥ चरकसंहिता १/४/३

[30] रघुवंशम् ६/७९